दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-5 ■ वर्ष-4 ■ अङ्क-30 | 1 | नवम्बर 30, 2024 | Website- www.himsanskritam.com Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८१, कलियुगाब्दः५१२५ हेमन्तऋतुः सूर्यदक्षिणायनम् मार्गशीर्षकृष्णचतुर्दशी तदोपरान्तः अमावस्या तिथिः मार्गशीर्ष १५ प्रविष्टांशः मङ्गलमयः भवेत्

2 केन्द्रसर्वकाराद् विशेष-औद्योगिकपुटकं याचितवान् मुख्यमन्त्री सुक्खुः



3 करीनायाः, करिश्मायाः च भ्रातुः आदर्शजैनस्य विवाहः भविष्यति



4 राज्यसभा लोकसभा उभयोः सदनयोः कार्यजातं दिवसात्मकं यावत् स्थिगितम्




## ६ दिसम्बरदिनांके भारतमण्डपमे आयोजितः भविष्यति त्रिदिवसीयः अष्टलक्ष्मीमहोत्सवः २०२४




हिमसंस्कृतवार्ताः। त्रिदिवसीयः अष्टलक्ष्मीमहोत्सवः २०२४ आगामिमासस्य ६ दिनाङ्के नवदिल्लीनगरस्य भारतमण्डपमे आयोजितः भविष्यति। अस्य महोत्सवस्य उद्घाटनं प्रधानमन्त्री नरेन्द्रमोदी करिष्यन्ति। महोत्सवे पूर्वोत्तरस्य अष्टानां राज्यानां – अरुणाचलप्रदेशस्य, असमस्य, मणिपुरस्य, मेघालयस्य, मिजोरमस्य, नागालैण्डस्य, त्रिपुरा-सिक्किमस्य च सांस्कृतिक-प्राकृतिक-शिल्प-सम्पदः प्रदर्शिताः भविष्यन्ति। नवदिल्लीनगरे पत्रकारसम्मेलनं सम्बोधयन् पूर्वोत्तरक्षेत्रस्य विकासमन्त्री ज्योतिरादित्यसिन्धिया उक्तवान् यत् एतत् आयोजनं पूर्वोत्तरभारतस्य देशस्य शेषभागस्य च सांस्कृतिकं आर्थिकं च अन्तरं पूरयिष्यति।

## फिजीदेशस्य उपप्रधानमन्त्री मनोआ कामिकामिका इत्यनेन सह मिलितवान् विदेशमन्त्री डॉ. सुब्रमण्यमजयशंकरः



हिमसंस्कृतवार्ताः फिजीदेशस्य उपप्रधानमन्त्री मनोआ कामिकामिका दिल्लीनगरे विदेशमन्त्री डॉ. सुब्रमण्यमजयशंकरेण सह मिलितवान्। डॉ. जयशंकरेण भारते सहकार्यार्थं विकासकार्यक्रमेषु च श्री कामिकामिकायाः सकारात्मकविचाराः श्रुत्वा प्रसन्नता प्रकटिता। उभौ जैविककृषेः सम्भावनाः, प्रौद्योगिक्याः अनुप्रयोगाः, अङ्कीयसाधनानाम् च विषये चर्चां कृतवन्तः । डॉ. जयशंकरः द्विपक्षीयसम्बन्धान् अग्रे सारयितुं कामिकामिकमहोदयस्य समर्थनस्य प्रशंसाम् अकरोत्।

## महाकुम्भः संस्कृति-कला-शिल्प-सञ्चारस्य वैश्विक-आदान-प्रदानस्य अवसरः अस्ति-केन्द्रीयसंस्कृतिपर्यटनमन्त्री गजेन्द्रसिंहशेखावतः



हिमसंस्कृतवार्ताः।केन्द्रीयसंस्कृतिपर्यटनमन्त्री गजेन्द्रसिंहशेखावतः उत्तरप्रदेशस्य प्रयागराजनगरे आयोजनीयः महाकुम्भमेला वैश्विकैकतायाः प्रतीकः इति उक्तवान्। महाकुम्भ २०२५ इत्यस्य उद्घाटनसमारोहं सम्बोधयन् श्री शेखावतः अवदत् यत् महाकुम्भः संस्कृति-कला-शिल्प-सञ्चारस्य वैश्विक-आदान-प्रदानस्य अवसरः अस्ति। उत्सवः विविधतायाः इति सः अवदत्। सः अवदत् यत् महाकुम्भमेलापकस्य कृते देशस्य विश्वस्य च कृते उत्तमं निवासस्थानं, परिवहनं, भ्रमणं च प्रदातुं सर्वकारः पूर्णतया प्रतिबद्धः अस्ति। अस्मिन् अवसरे उत्तरप्रदेशस्य पर्यटनसंस्कृतिमन्त्री जयवीरसिंहः सर्वेभ्यः विदेशीयप्रतिनिधिभ्यः आग्रहं कृतवान् यत् ते स्वस्य निकटजनं महाकुम्भं प्रति आमन्त्रयन्तु। सः अवदत् यत् केन्द्रस्य राज्यस्य च संयुक्तप्रयत्नेन महाकुम्भः विदेशीयानां अतिथिनां स्वागतयोग्यः अभवत्। अस्मिन् अवसरे भूटान, नेपाल, श्रीलङ्का, इन्डोनेशिया, मॉरिशस, मलेशिया, म्यांमार, अमेरिका, यूके, दक्षिण आफ्रिका, आस्ट्रेलिया, सऊदी अरब, पोलैण्ड, ब्राजील, नाइजीरिया, जापान इत्यादीनां देशानाम् राजदूताः उच्चायुक्ताः च उपस्थिताः आसन्। महाकुम्भ-२०२५ आगामिवर्षस्य १३ जनवरीतः आरभ्य २६ फेब्रुवरी दिनाङ्के समाप्तं भविष्यति।

## राहुलगान्धिनः प्रधानमंत्रीनरेन्द्रमोदीविषयकं कथनं शोकप्रदम्, विदेशमन्त्रालयेन काङ्ग्रेसनेतुः कथनस्य निन्दा कृता



(हिमसंस्कृतवार्ताःनवदेहली) विदेशमन्त्रालयेन शुक्रवासरे लोकसभायां विपक्षनेत्रा राहुलगान्धीइत्यनेन प्रधानमन्त्रिणः नरेन्द्रमोदिनः विषये प्रदत्तस्य वक्तव्यस्य निन्दा कृता। ध्यातव्यं वर्तते यद् राहुलगान्धी प्रधानमन्त्रिमोदीविषये कथितवान् यत् "प्रधानमन्त्रिण मोदीवर्यस्य स्मरणशक्तिः अपि अमेरिकादेशस्य राष्ट्रपतिः जो बाइडेन इव दुर्बला" अस्ति। अस्य कथनस्य प्रतिक्रियारूपे विदेशमन्त्रालयस्य प्रवक्ता रणधीरजयसवालः अवदत् यद् भारतस्य अमेरिकायाश्च परस्परं सम्बन्धः बहुवर्षाणां परिश्रमस्य, सम्मानस्य, सहकार्यस्य च परिणामः अस्ति। एतादृशाः प्रतिक्रियाः कथनोपकथनञ्च मैत्रीपूर्णसम्बन्धाय नोचितम्।

## सम्भलस्थ-शाही जामा मस्जिद-समित्याः मस्जिद-सर्वेक्षण-प्रकरणस्य विषये उच्चन्यायालये गन्तुं निर्दिष्टम्

हिमसंस्कृतवार्ताः सर्वोच्चन्यायालयेन उत्तरप्रदेशस्य सम्भलस्थ-शाही जामा मस्जिद-समित्याः मस्जिद-सर्वेक्षण-प्रकरणस्य विषये उच्चन्यायालये गन्तुं निर्दिष्टम्। भारतस्य मुख्यन्यायाधीशस्य संजीवखन्ना वर्यस्य, न्यायाधीशस्य संजयकुमारस्य च पीठः सम्भल-मस्जिद-सर्वेक्षणस्य अनुमतिं प्रदत्तस्य सम्भल-विचारन्यायालयस्य आदेशस्य वाद-श्रवणं कुर्वन् आसीत्। सर्वोच्चन्यायालयेन निम्न न्यायालयाय निर्देशः दत्तः यत् यावत् सर्वेक्षण-आदेशस्य विरुद्धं मस्जिद-समित्या पंजीकृत याचिका इलाहाबाद उच्चन्यायालये सूचीकृता न भवेत तावत् प्रकरणम् अग्रे न वर्धेत् इति। न्यायालयेन इदमपि निर्दिष्टं यत् मस्जिदस्य सर्वेक्षणं कुर्वन्तौ अधिवक्ता आयुक्तौ च प्रतिवेदनं एकस्मिन् सुरक्षित आवरणे स्थापयन्तु इति।

## सुभाषितम्

**महाजनस्य संपर्कः कस्य नोन्नतिकारकः।**
**पद्मपत्रस्थितं तोयं धत्ते मुक्ताफलश्रियम्।।**

अर्थात्- महाजनों गुरुओं के संपर्क से किस की उन्नति नहीं होती? कमल के पत्ते पर पड़ी पानी की बूंद मोती की तरह चमकती है।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp number

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## पर्यटनस्य पार्श्वे नैकेषां जनानां जीवने समृद्धिम् आनेतुं सामर्थ्यं वर्तते-प्रधानमंत्रीनरेन्द्रमोदी



हिमसंस्कृतवार्ता प्रधानमन्त्रिणा नरेन्द्रमोदिना सबलं प्रतिपादितं यत् पर्यटनस्य पार्श्वे नैकेषां जनानां जीवने समृद्धिम् आनेतुं सामर्थ्यं वर्तते। प्रतिष्ठितपर्यटनकेन्द्राणां विकासाय चत्वारिंशत् परियोजनानां अनुमोदनस्य घोषणा कुर्वता पर्यटनमन्त्रिणः गजेन्द्रसिंहशेखावतस्य सामाजिक सञ्चालीयः सन्देशं पुनः प्रसारयन्ता श्रीमोदीना उक्तम् यत् भारतस्य पर्यटनस्य आधारभूतसंरचनायाः संवर्धनाय सर्वकारः निरन्तरं ध्यानं दास्यति। सः अवदत् यत् एतेन प्रयासेन अधिकाः जनाः अतुल्यभारतस्य आश्चर्यं अनुभवितुं शक्नुवन्ति इति सुनिश्चितं भविष्यति।

# सांस्कृतिक- छात्रविद्वत्सम्मेलनम्-संस्कृतभाषणे श्रुतिकौशल, मन्त्रोच्चारणे वंशिकासागर, श्लोकोच्चारणे अक्षिता, गीतिकागायने च प्रथमस्थाने




हिमसंस्कृतवार्ताः - आनी। हिमाचल- संस्कृत- अकादमी हिमाचलसर्वकारः शिमलाद्वारा वर्ष २०२४-२५ इत्यस्य सत्रस्य कृते विद्यालयीयानां छात्राणां संस्कृतप्रतियोगितानाम् आयोजने कुल्लूजनपदस्य प्रतियोगिताः सांस्कृतिकछात्रविद्वत्सम्मेलनं च राजकीये वरिष्ठमाध्यमिके विद्यालये आनी इत्यत्र च सम्पन्नाः। छात्रैः सोत्साहेन संस्कृतप्रतियोगितासु सहभागिता कृता। उद्घाटनसत्रस्य मुख्यातिथिः जवाहर ठाकुरः प्रधानाचार्यः कन्यावरिष्ठमाध्यमिकविद्यालयः आनी, अध्यक्षः प्रधानाचार्यः बालवरिष्ठमाध्यमिकविद्यालयः आनी श्यामानन्द शर्मा, संस्कृतविद्वान् पूर्वसचिवः अकादमी डॉ. मस्तरामशर्मा सरस्वतीमातुः पुरतः दीपप्रज्ज्वालनेन माल्यार्पणेन च शुभारम्भं कृतवन्तः। सारस्वतातिथिरूपेण सेवानिवृत्तः प्राचार्यः डॉ. लीलाधर वात्सायनः, डॉ ऋतेश शर्मा, शास्त्री लोकपालः, संस्कृतशिक्षकपरिषदः कुल्लूजनपदस्य अध्यक्षः हेमलालः सेवानिवृत्तः संस्कृत शिक्षकः च आसन्। अकादमी सचिवः डॉ. केशवानंद कौशलः अवदत् यत् विद्यालयीया छात्राणां कनिष्ठवर्गस्य द्वे प्रतियोगिते मन्त्रोच्चारणं श्लोकोच्चारणं च अभवताम्। तथैव वरिष्ठवर्गस्य अपि संस्कृतगीतिका एवं संस्कृतभाषणम् एते द्वे प्रतियोगिते सम्पन्ने। मन्त्रोच्चारणे वंशिका सागर राजकीयवरिष्ठमाध्यमिकविद्यालयः आनी प्रथमम्, सुरभिः सरस्वतीविद्यामन्दिरं दलाशः द्वितीयम्, राजकीय- उच्चविद्यालयः रोवा तृतीयम्, समीरः राजकीयवरिष्ठमाध्यमिकविद्यालयः लढागी चतुर्थं स्थानं प्राप्तवन्तः। श्लोकोच्चारणे अक्षिता कुमारी राजकीय- वरिष्ठ- माध्यमिक- विद्यालयः निगान प्रथमम्, शगुण राजकीय- वरिष्ठ- माध्यमिक- विद्यालयः बुच्छैर द्वितीयम्, विपुल राजकीय- वरिष्ठ- माध्यमिक- विद्यालयः आनी तृतीयम्, अदिति कुमारी राजकीय- वरिष्ठ- माध्यमिक- पाठशाला रोवा चतुर्थपुरस्कारं प्राप्नुवन्। सोहानी शर्मा राजकीय- कन्या- वरिष्ठ- माध्यमिक- विद्यालयः आनी प्रथमं, पवनः राजकीय-वरिष्ठ- माध्यमिक- विद्यालयः छात्र आनी द्वितीयम्, मीनाक्षी शर्मा राजकीय- वरिष्ठ- माध्यमिक- विद्यालयः सवाड़ तृतीयम्, अक्षिता राजकीय- वरिष्ठ- माध्यमिक- विद्यालयः निगान चतुर्थपुरस्कारं प्राप्नुवन्। संस्कृतभाषणप्रतियोगितायां श्रुतिशर्मा राजकीय- कन्या- वरिष्ठ- माध्यमिक- विद्यालयः आनी प्रथमम्, अनामिका राजकीय- वरिष्ठ- माध्यमिक- विद्यालयः बुच्छैरः द्वितीयम्, आरती ठाकुर राजकीयवरिष्ठमाध्यमिकविद्यालयः आनी तृतीयं, महक सरस्वतीविद्यामन्दिरं दलाशः च चतुर्थं स्थानं प्राप्तवन्तः। एवमेव त्रीणि प्रथमस्थानानि प्राप्य राजकीयकन्यावरिष्ठमाध्यमिकविद्यालयः आनी सर्वोत्तमः विद्यालयः इति पुरस्कारं प्राप्नोत्।

**पुरस्कारवितरणसमारोहस्य मुख्यातिथिः डॉमस्तरामशर्मा** सेवानिवृत्तः विशेषाधिकारी पूर्वसचिवश्च संस्कृत- अकादमी प्रधानाचार्यः कन्यावरिष्ठमाध्यमिकविद्यायः अकादमी सचिवः च डॉ केशवानंदः कौशलः विजेतृन् छात्रान् पुरस्कृतवन्तः। डॉ. मस्तरामशर्मा स्वीये सम्बोधने अकथयत् यत् संस्कृतस्य संवर्द्धनाय छात्रेषु अभिरुचि- उत्पादनाय च संस्कृत- अकादमीद्वारा प्रशंसनीयं कार्यं क्रियते। आगामी कालः भारतीय- ज्ञान-परम्परायाः अस्ति सा परम्परा संस्कृते एव निहिता अस्ति। राजकीयवरिष्ठमाध्यमिकविद्यालयस्य झण्डूत्तायाः प्रधानाचार्यः जवाहरः ठाकुरः प्रतियोगितानाम् आयोजनाय आनी विद्यालयस्य चयनं कर्तुम् अकादम्याः धन्यवादं ज्ञापितवान्। अपि च सर्वेषाम् विदुषां शिक्षकाणां प्रतिभागिछात्राणां च अभिनन्दनं कृतवान्।

# केन्द्रसर्वकाराद् विशेष- औद्योगिकपुटकं याचितवान् मुख्यमन्त्री सुक्खुः



हिमसंस्कृतवार्ताः- शिमला। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः नवदेहल्यां केन्द्रीयव्यापार- उद्योगमन्त्री पीयूषगोयलं मिलितवान्। मुख्यमन्त्री केन्द्रीयमन्त्रिणं हिमाचलप्रदेशाय विशेष औद्योगिकपुटकं प्रदातुं आग्रहं कृतवान्। सः अवदत् यत् सन्तुलितं क्षेत्रीयविकासं सुनिश्चित्य जम्मू- कश्मीर- पूर्वोत्तरराज्ययोः समं हिमाचलप्रदेशाय विशेष औद्योगिकपुटकं प्रदातुं समयस्य आवश्यकता अस्ति। हिमाचलसदृशानां पर्वतीयक्षेत्राणां कृते परिवहनसहायतायोजनां पूर्ववत् पुनः आरभ्यत इति अपि आग्रहं कृतवान्। मुख्यमन्त्री उक्तवान् यत् राज्ये कठिनभौगोलिकस्थित्या परिवहनस्य व्ययः अतीव अधिकः अस्ति। मुख्यमंत्री उक्तवान् यत् एतेन औद्योगिक-उत्पादनस्य, निर्यातस्य च प्रवर्धने बहु साहाय्यं भविष्यति। औद्योगिक- मूलसंरचना- विकासपरियोजनानां, गुणवत्तापरीक्षण- प्रयोगशालानां, निर्यातप्रवर्धनार्थं प्रमाणीकरण- प्रयोगशालानां च कृते उदारवित्तीयसहायतायाः अपि आग्रहं कृतवान्। मुख्यमन्त्री औद्योगिक- विकासयोजनायाः अन्तर्गतं लम्बितराशिं पूंजीसहायतां विमोचयितुं, आईडीएस- अन्तर्गतं लम्बितप्रकरणानां शीघ्रम् अनुमोदनस्य च आग्रहं कृतवान्।

# आयुष्मान भारतः योजनायां हिमाचलप्रदेशे 70 वर्षातीतं वृद्धजनानां कृते पञ्चलक्षपर्यन्तं चिकित्सायाः सुविधा निःशुल्कम्

हिमसंस्कृतवार्ताः- शिमला।

हिमाचलप्रदेशे सप्ततिवर्षातीतं वा अधिकवयस्काः वरिष्ठनागरिकाः इदानीं पञ्चलक्षपर्यन्तं निःशुल्कं चिकित्सालाभं प्राप्स्यन्ति। आयुष्मानभारत- प्रधानमंत्री- जन- आरोग्य- योजनायाः अन्तर्गतम् एषः लाभः भविष्यति। वृद्धजनानां योजनायाम् अन्तर्भावाय शासनद्वारा अधिसूचना निस्सारिता। शीघ्रमेव योजनायाः अन्तर्गतं वरिष्ठनागरिकानां कार्डनिर्माणं भविष्यति।

एतेन लाभार्थिनः देशस्य कस्यचित् चिह्नितस्य शासकीयं वा निजीं चिकित्सालयं गत्वा निःशुल्कं चिकित्सां प्राप्स्यन्ति। योजनया सहस्रशः वरिष्ठनागरिकाः लाभं प्राप्स्यन्ति। मंत्रिमण्डलस्य उपावेशने वरिष्ठनागरिकानां योजनायाम् अन्तर्भावं स्वीकृत्य अधिसूचनां प्रकाशिता।

## शासनस्य अधिसूचना-

स्वास्थ्यसचिवः एम. सुधा देवी उवाच यथा मंत्रिमण्डलस्य निर्णयानुसारं सप्ततिवर्षातीतं वरिष्ठनागरिकानाम् आयुष्मानभारत- प्रधानमंत्री- जन- आरोग्य- योजनायाम् अन्तर्भावाय अधिसूचना प्रकाशिता। हिमाचले इदानीं द्विलक्षजनानाम् आयुष्मानपत्राणि निर्मितानि। जनानां चिकित्सायाः कृते 'हिमकेयर' नामिका योजना अपि प्रवर्तिता। हिमकेयरपत्रेण च पञ्चलक्षपर्यन्तं चिकित्सां कर्तुं शक्यते।

## एषु रोगेषु भविष्यति चिकित्सालाभः

आयुष्मानपत्रेण वृद्धाः कर्कटरोगः, वृक्करोगः, हृदयरोगः, डेंगू, चिकनगुनिया, मलेरिया, डायलिसिस, जानु- श्रोणिप्रतिस्थापनम्, लिङ्गनाशस्य रोगिणश्च अपि निःशुल्कं चिकित्सालाभं प्राप्स्यन्ति।

## आयुष्मान पत्राणि कुत्र कथं च निर्मीयते?

पारिवारिकसमग्रप्रमाणपत्रम् सहितं एकं परिचयपत्रं (आधारपत्रं, पञ्चपत्रं, चालकपरिचयपत्रं, मतदानपत्रं, शासकीयपरिचयपत्रं वा अन्यं) गृहीत्वा गन्तव्यम्। सामूहिकसेवासंस्थायाम्, लोकसेवाकेन्द्रे, यूटीआई-आई टीएसएल केन्द्रे च पात्रतानिरीक्षणं कृत्वा पत्रं निर्मीयते।चिह्नितग्रामरोजगारसहायकस्य वार्डप्रभारीस्य च सहयोगेन अपि पत्रं निर्मीयते।योजनासंबद्धचिकित्सालये प्रवेशनस्य स्थितौ आयुष्मानमित्रस्य माध्यमेन अपि पत्रं निर्मीयते।

# भाजपायाः आरोपः, केवलं प्रश्नान् परिहर्तुं आहूतम् ४ दिवसस्य शिशिरस्य सत्रम्




हिमसंस्कृतवार्ताः - शिमला। हिमाचलप्रदेशविधानसभायाः शिशिरसत्रस्य तिथिनिर्णयानन्तरं राजनैतिकी अशान्तिः तीव्रा अभवत् । अधिवेशनस्य अवधिः केवलम् चत्वारि दिनानि कर्तुम् इति कारणेन भारतीयजनतापक्षेण काङ्ग्रेससर्वकारे तीव्रं वाक्प्रहारं कृतम्। भाजपाराज्यमाध्यमप्रभारी विधायकः रणधीरशर्मा च अवदत् यत् विपक्षस्य प्रश्नान् परिहर्तुं काङ्ग्रेससर्वकारः एतादृशानि पदानि गृह्णाति। रणधीरशर्मा इत्यनेन उक्तं यत् वर्तमानकाङ्ग्रेससर्वकारस्य निर्णयैः देशे सर्वत्र हिमाचलप्रदेशस्य प्रतिबिम्बं क्षतिग्रस्तं जातम्। अधुना विपक्षस्य प्रश्नान् परिहर्तुं चतुर्दिवसीयं शिशिरसत्रम् आहूय जनान् भ्रामयितुं प्रयत्नः क्रियते। प्रावृट्सत्रस्य विस्तारः कृतः इति तर्कः भविष्यति, परन्तु ततः पूर्वं बजटसत्रम् अपि लघुकृतम् आसीत् । रणधीरशर्मा उक्तवान् यत् विधानसभा अध्यक्षस्य वक्तव्येभ्यः सः सर्वकारस्य आज्ञानुसारं कार्यं कुर्वन् अस्ति इति भासते। विधानसभासभापतिपदं गौरवस्य प्रतीकं भवति, परन्तु तस्य अद्यतनवक्तव्यं लोकतान्त्रिकपरम्पराणां |

# आचार्य- महामण्डलेश्वर- स्वामी- कैलाशानन्दगिरि- महाराज इत्यस्मै प्रदत्तः श्रीकैलख- संस्कृतरत्न- पुरस्कारः 2024





## उपराज्यपालवर्येण संस्कृतस्य संवर्धनाय भारतस्य महत्सभ्यतायाः आदर्शानां च प्रचाराय तस्य अप्रतिममवदानं प्रशंसितम्

हिमसंस्कृतवार्ताः- महन्तः रोहित शास्त्री।

जम्मूः- वाग्देव्याः समर्चनपुरस्सरं कार्यक्रमस्य प्रारम्भः जातः। तत्र सर्वैरपि अतिथिभिः सह सादरं महामहिम- उपराज्यपालवर्याणामभिनन्दनं विहितम्।महामहिम- उपराज्यपालः मनोजसिन्हा महोदयः श्रीकैलख- ज्योतिष- वैदिक- संस्थानट्रस्टद्वारा आयोजिते समारोहे परमपूज्याय निरञ्जन- पीठाधीश्वराय श्री श्री 1008 आचार्य- महामण्डलेश्वराय संस्कृतगौरवाय स्वामिने कैलाशानन्दगिरि जी महाराजाय कैलखसंस्कृतरत्नपुरस्कारं समर्पितवान्। तत्र स्वभाषणे उपराज्यपालवर्यः स्वामी कैलाशानन्द गिरि जी महाराजं प्रबुद्धः सन्तः, योगगुरुः, विख्यातश्च विद्वान् इत्यादिकं विवर्ण्य संस्कृतस्य प्रचाराय भारतस्य महत्- सभ्यतायाः आदर्शानां च प्रचाराय तस्य अद्वितीयमवदानं वरीवर्ति इति प्रशंसितवान्। उपराज्यपालवर्येण उक्तं यत् "भारतस्य मूल्यम्, सर्वसमावेशीसंस्कृतिः, कलात्मकपरम्परा, 'वसुधैव कुटुम्बकम्' इत्यादि- भावनासंवर्धनादिकञ्च अस्माकं प्राथम्यमस्ति। भारतं भाविजनानां च कृते शाश्वतम्, शान्तिपूर्णं, प्रगतिशीलं च जगत् रूपयिष्यति। तेन प्रोक्तं यत् भारतं 2047 वर्षं यावद् विकसितं राष्ट्रं भविष्यति। स्वसम्बोधने राज्यपालवर्येण अस्मिन् समारोहे निगदितं यत् सर्वविधप्रयत्नकर्तृषु वैज्ञानिकाः आध्यात्मिकाश्च जनाः विकासप्रक्रियायाः नावीन्यं प्रोत्साहयितुमग्रे आगच्छन्तु इति।समारोहे उपराज्यपाल महोदयः महन्तस्य रोहितशास्त्रिणः श्रीकैलख- ज्योतिष- वैदिक- संस्थानद्वारा संस्कृतभाषायाः प्रसाराय प्रचाराय च कृतसर्वविधमवदानं च प्रशंसयति। अनेन संस्थानेन 'मोबाइल/ संस्कृत- गुरुकुलम्,' 'सरलसंस्कृतबोधः' इति प्रकाशनम्, 'कर्तव्यपथ' पत्रिका च इत्यादिकानि संस्कृतप्रचारकार्याणि सम्पादितानि।कार्यक्रमस्यान्ते रोहित शास्त्री अतिथिभिस्सह समेषां कार्तज्ञ्यं विनिवेदयति। तत्र समारोहे माननीयः विधायकः श्यामलाल शर्मा, कुलपतिः प्रो. बीएन त्रिपाठी, श्रीकैलख- ज्योतिष- वैदिकसंस्थान ट्रस्ट इत्यस्य अध्यक्षः महन्तः रोहित शास्त्री, वरिष्ठाधिकारिणः, आध्यात्मिकगुरवः, धार्मिकसंगठनप्रमुखाः, नागरिकाः, गणमान्याः जनाः छात्राश्च समुपस्थिता आसन्।

# चलचित्रवार्ताः

## करीनायाः, करिश्मायाः च भ्रातुः आदर्शजैनस्य विवाहः भविष्यति



हिमसंस्कृतवार्ताः- जगदीशडाभी (मुम्बई) एकाप्राप्तवार्तानुसारं करीना कपूरस्य करिश्मा कपूरस्य च भ्रातुः आदर्शजैनस्य विवाहः भविष्यति। आदरः स्वस्य दीर्घकालीनमित्रम् अलेखा आडवाणी इत्यनेन सह विवाहं कुर्वन् अस्ति। अद्यैव आदर- अलेखायोः रोका- समारोहस्य आयोजनं कृतम्। अस्मिन् रोका- समारोहे सम्पूर्णं कपूरपरिवारं दृष्टम्। कपूरपरिवारः अलेखायाः सर्वात्मना स्वागतं कृतवान्। अस्मिन् रोकासमारोहे करीना कपूरः स्वभ्रातुः आदरस्य, भावी भ्रातुजायायाः अलेखा आडवाणी इत्यस्याः च पूजां कृतवती। अस्य चित्राणि सम्प्रति सामाजिकमाध्यमेषु वायरल भवन्ति। स एव करिश्मा वधोः ललाटे तिलकं स्थापयति स्म। आदरस्य भ्राता रणबीरकपूरः अपि वधूयाः ललाटे तिलकं स्थापयति स्म। अस्मिन् रोकासमारोहे सैफ अली खानः अपि दृष्टः। सैफः परिवारेण सह विनोदं कुर्वन् दृष्टः आसीत्।

# गढ़वालविश्वविद्यालयस्य बिडलापरिसरस्य संस्कृत- विभागेन सञ्चाल्यते संस्कृतसम्भाषणकार्यशाला

हिमसंस्कृतवार्ताः- उत्तराखण्ड।संस्कृतविभागाध्यक्षया प्रो. कमलाचौहानमहोदयायाः नेतृत्वे सहायकप्राध्यापकैः प्राध्यापकैः च सह संयुक्तं हेमवतीनन्दनबहुगुणा- केन्द्रीय- विश्वविद्यालयस्य बिड़लापरिसरस्य चतुर्थदिवसे अपि संस्कृतसम्भाषणकार्यशाला सफलतया निरन्तरं प्रवर्तते। अस्यां कार्यशालायां विद्वद्भिः उक्तं यत् संस्कृतभाषा भारतीयसंस्कृतेः परम्परायाश्च आत्मा अस्ति। एषा केवलं प्राचीनग्रन्थानां वेदानां च भाषा न, अपितु अद्यतनकालस्य अपि स्थायित्वं प्राप्यते। एतस्याः कार्यशालायाः मुख्यम् उद्देश्यं संस्कृतस्य शिक्षणं, शिक्षणं च प्रत्यक्षानुभवेन, संख्याविधानं, समयनिर्देशनं वस्तूनां प्रयोगेण च सम्भाषणं सम्पादयितुं यत्नः। कार्यशालायां डॉ. बालकृष्णबधानीमहोदयाः प्रतिभागिनः संस्कृतभाषायां प्रेरितवन्तः। ते उक्तवन्तः यत् संस्कृतं केवलं पठनपाठनस्य विषयः न, अपितु एषा जीविता भाषा अस्ति, या अस्माभिः दैनिकजीवने उपयोजनीया। तैः छात्राणां कृते कार्यशालायाः महत्त्वं विज्ञापितं यत् अस्माभिः एवम्प्रकारेण संस्कृतविषयकं सम्भाषणं, ज्ञानं व्यवहारः च प्राप्यते येन प्रतिदिनं संस्कृतस्योन्नतिः भवति। कार्यशालायां डॉ. आशुतोषगुप्तः संस्कृतगीतानां वाचनं शिक्षयित्वा प्रतिभागिनः प्रेरितवन्तः। तेन गीतैः संस्कृतस्य प्रचारं संवर्धनं च कर्तुं मनसा, वाचा, कर्मणा च प्रयत्नं आवश्यकं इति सन्देशः दत्तः। आशुतोषगुप्तस्य मतं यत् यदि माता सुन्दरी न अपि, तदा अपि तस्याः अनादरं न कर्तव्यम्। तथैव, संस्कृतम् अस्माकं मातृभाषा अस्ति। एषा केवलं भाषा न, अपि तु अस्माकं परम्परा, संस्कृतिः, जीवनमूल्येषु च आधारभूता अस्ति। तस्याः रूपं यदपि भवेत्, सा अस्माभिः सदा पूजनीया। संस्कृतं सरला स्पष्टा च अस्ति। अन्यासु भाषासु यः कठिनः अस्ति, सः संस्कृतेन सुलभं व्यक्तुं शक्यते। संस्कृतस्य व्याकरणं सुगठितं सुव्यवस्थितं च, यत् भाषायाः सौन्दर्यं स्थायित्वं च वर्धयति। आशुतोषगुप्तस्य अभिप्रायः यत् यदि संस्कृतं रक्षितुम् इच्छामः, तर्हि अस्माभिः तस्या दैनिकजीवने प्रयोगं कर्तव्यम्। संस्कृतं केवलं पाठ्यविषयं न, अपि तु वार्तालापभाषा भवेत्। बालकाः यदि लघुवाक्यैः संवादम् आरभन्ते, तदा संस्कृतं पुनः सजीविता भवेत्।

अस्मिन्नेव कार्यशालायां प्रतिदिनं सप्ततिः छात्राः सक्रियतया सहभागं कुर्वन्ति। ते संस्कृतेन वार्तालापकौशलं विकसितवन्तः। संस्कृतस्य सरलं सौन्दर्यं च अनुभव्यमानं भवति।अंग्रेजीविभागस्य डॉ. सविताभण्डारी अपि अस्यामेव कार्यशालायां भागं कृत्वा अन्येषां प्रतिभागिनः प्रेरयन्ति। एषः उदाहरणः प्रदर्शयति यत् भाषाणां बन्धनं न अस्ति।



अस्य कार्यशालायाः प्रमुखं पक्षं यत् छात्राः संस्कृतवार्तालापं आत्मसात्कृतवन्तः। एषा केवलं भाषाशिक्षायाः न, अपि तु सांस्कृतिकमूल्येषु स्थिरीकरणं च साध्यते।

हेमवतीनन्दनबहुगुणा- विश्वविद्यालयस्य बिड़लापरिसरस्य संस्कृतविभागेन आयोजिता सरलसंस्कृतसम्भाषणकार्यशाला भारतीयसमाजे संस्कृतभाषायाः पुनर्जीवनं प्रति महान् प्रयासः अस्ति। एषा कार्यशाला न केवलं भाषा पुनर्जीवनाय, अपि तु अस्माकं प्राचीनसमृद्धेः संवर्धनाय च अद्भुतं साधनं भवति।

# राज्यपालेन उत्तराखण्ड- संस्कृत- विश्वविद्यालयस्य 30 छात्रेभ्यः स्वर्णपदकं प्रदत्तम्





## विश्वस्य श्रेष्ठतमसंस्कृतेः आधारः संस्कृतं - "राज्यपालः" ।। दीक्षान्तसमारोहे 3047 छात्रेभ्यः उपाधयः प्रदत्ताः

### सत्रं 2022-23 इत्यस्य 1582 छात्रेभ्यः, सत्रं 2023-24 इत्यस्य 1465 छात्रेभ्यः उपाधयः प्रदत्ताः

हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला। हरिद्वारम्।

उत्तराखण्डसंस्कृतविश्वविद्यालयस्य एकादशतमे दीक्षान्तसमारोहे माननीयराज्यपालः च विश्वविद्यालयस्य कुलाधिपतिः लेफ्टिनेंटजनरलः श्रीगुरमीतसिंहः (सेवानिवृत्तः) त्रिंशत् स्नातकपरास्नातकछात्रेभ्यः स्वर्णपदकं प्रदत्तवान्। तदनन्तरं विश्वविद्यालयस्य विविधविभागेषु एकविंशतिछात्रेभ्यः विद्यावारिधि- उपाधिं प्रदाय सम्मानितवान्। राज्यपालस्य करैः स्वर्णपदकं विद्यावारिधिं च उपाधिं प्राप्य छात्राः अत्यन्तं हृष्टाः आसन्।दीक्षान्तसमारोहस्य अध्यक्षतां कुर्वन् राज्यपालः श्रीगुरमीतसिंहः उक्तवान् यत् कस्यापि राष्ट्रस्य आत्मा तस्य संस्कृतिः अस्ति। संस्कृतिः यावत् जीवति सुरक्षितं च भवति, तावत् राष्ट्रम् अपि जीवति सुरक्षितं च भवति। विश्वस्य सर्वासु संस्कृतिषु प्राचीनतमं श्रेष्ठं च भारतीया संस्कृतिः अथवा वैदिकसंस्कृतिः अस्ति। अस्याः संस्कृत्याः आधारः संस्कृतभाषा अस्ति। संस्कृतभाषां विना भारतीयसंस्कृतिः च भारतीयसंस्कृतिं विना च भारतस्य कल्पना अपि अशक्या। राज्यपालः स्वर्णपदकं उपाधिं च प्राप्नुवतां छात्राणां प्रति उक्तवान् यत् ते भारतस्य समृद्धिम् अग्रे नेतुं प्रयत्नं कुर्वन्तु, तदा एव तेषां पदकस्य उपाधेः च सार्थकता भविष्यति। तेऽपि उक्तवन्तः यत् राष्ट्रनिर्माणे युवशक्तेः भूमिकाः अतीव महत्त्वपूर्णाः। भारतीययुवशक्तेः स्कन्धे एव संस्कृतं संस्कृतिं च अग्रे नेतुं महत्त्वपूर्णं दायित्वं स्थापितं भवति। ते उक्तवन्तः यत् विश्वस्य सम्पूर्णा शिक्षा संस्कृतभाषायामेव अन्तर्भवति।

दीक्षान्तसमारोहे राज्यपालेन विविधक्षेत्राणां विदुषः, राममन्दिरट्रस्टकोषाध्यक्षःस्वामीगोविन्ददेवगिरीमहाराजः, देवसंस्कृतिविश्वविद्यालयस्य प्रतिकुलपतिः डॉ. चिन्मयपण्ड्या, केन्द्रसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवासनवरखेड़ी च विद्यावाचस्पतिः (डी. लिट) इत्यस्य मानदोपाधिं प्रदाय सम्मानिताः।

दीक्षान्तसमारोहे विश्वविद्यालयस्य कुलपतिः प्रो. दिनेशचन्द्रशास्त्री उक्तवान् यदि संस्कृतिः भारतदेशस्य आत्मा अस्ति, तदा संस्कृतभाषा संस्कृतेः आत्मा अस्ति। प्रो. शास्त्री विश्वविद्यालयस्य अधिसंरचना, विभिन्नसंस्थानैः सह कृतानि एम. ओ. यू. च विश्वविद्यालयस्य प्रगतिं विषये प्रकाशं चकार। विश्वविद्यालयेन ज्योतिषयोगवेदकर्मकाण्डादिषु अतीव न्यूनसेवाराशौ परामर्शसेवा प्रदीयते। इत्यस्माद् कारणात् जनसामान्यः अस्य लाभं लभेत्। दीक्षान्तसमारोहे 3047 छात्रेभ्यः उपाधयः प्रदत्ताः। सत्रं 2022-23 इत्यस्य 1582 छात्रेभ्यः तथा सत्रं 2023-24 इत्यस्य 1465 छात्रेभ्यः उपाधयः प्रदत्ताः। अस्मिन्नेव अवसरे उत्तराखण्ड- आयुर्वेद-विश्वविद्यालयस्य कुलपतिः प्रो. अरुणकुमारत्रिपाठिः, उत्तराखण्ड- मुक्तविश्वविद्यालयस्य कुलपतिः प्रो. ओमप्रकाशनेगी, उत्तराखण्ड- औद्यानिकी-विश्वविद्यालयस्य कुलपतिः प्रो. परविन्दरकौशलः, प्रो. यशबीरसिंहः इत्यादयः गणमान्यजनाः उपस्थिताः। विश्वविद्यालयस्य कुलसचिवः गिरीशकुमारः अवस्थी सर्वेभ्यः अतिथिभ्यः धन्यवादं ज्ञापितवान्। संचालनं डॉ. प्रकाशपन्तः कृतवान्।

स्वर्णपदकसम्मानितेषु दीक्षान्तसमारोहे मेधावीछात्रछात्रासुष रितेशकुमारतिवारी, अभिषेकसैनी, कु. वन्दनामौर्या, सूरजतिवारी, विनीता, हिमांशुमुण्डेपी, शुभाङ्गिनीतिवारी, सागरखेमरिया, परविन्दरसिंहः, चन्द्रमोहनः, ताजीमफात्मा, उपासनावर्मा, निधिः, ब्रजेशकुमारजोशी, देवव्रतः, हिमांशुः, सन्नी, अमितजोशी, सुबोधबहुगुणा, अनुरागशर्मा, अतुलध्यानी, कु. प्रतिज्ञाचौहानः, भारतकुमारः, पवनजोशी, निधिः, शिफालियाफरीनः, नीतूतलवारः, गुरमीतसैनः, कु. स्वातिः, मनीषशर्मा इत्येते स्वर्णपदकेन सम्मानिताः अभवन्।

# क्यार्टूसंस्कृतमहाविद्यालयः "रैड् रीबन क्लब" इत्यलभत

**हिमसंस्कृतवार्ताः शिमला क्यार्टू।** राजकीय-संस्कृत-महाविद्यालयः क्यार्टू प्रथमवारं "रैड् रीबन क्लब" प्राप्तवान् । एतस्य मुख्यं प्रयोजनं "AIDS" इत्साध्यरोगात् रक्षायै जनजागरणम्, तद्रोगग्रस्तानां यथायोग्यसहयोगकरणञ्चास्ति । योजनेयं केन्द्रसर्वकारस्यास्ति । महाविद्यालयस्य प्राचार्यैः डॉ.राकेशकुमारशर्ममहाभागैः "रैड् रीबन क्लब" इत्यस्य प्रथमसमन्वयकरूपेण महाविद्यालयस्य दर्शनाचार्यः डॉ.सन्तोषकुमारः निर्दिष्टः । नवम्बरमास्य २८ दिनाङ्के राजकीय-उपाधि-महाविद्यालयः सञ्जोली इत्यत्र तत्सम्बद्धं प्रशिक्षणं जातम् । समन्वयकेन सहिताः महाविद्यालयप्रशासनेन चिताः शास्त्रि-तृतीय-वर्षस्य रविशर्मा, हर्षितश्च शास्त्रि-द्वितीय-वर्षस्य भीष्मश्चेति त्रयः छात्राः एतत्प्रशिक्षणमाप्नुवन् । शिमलाजनपदस्य प्रायशः ३० "रैड् रीबन क्लब" इत्येतेषां प्रतिनिधयः तत्र प्रशिक्षणं प्राप्तवन्तः । "ICTC DDU" शिमलातः आगता श्रीमती रमेंदर-मनचन्दा-महोदया तत्र मुख्यप्रशिक्षिका आसीत् ।



मुख्यप्रशिक्षिकया श्रीमत्या रमेंदर-मनचन्दा-महोदयया सह क्यार्टूसंस्कृत-महाविद्यालयस्य प्रतिनिधयः

# राज्यसभा लोकसभा उभयोः सदनयोः कार्यजातं दिवसात्मकं यावत् स्थिगितम्

हिमसंस्कृतवार्ताः,नवदेहली। संसदः सदनद्वयम् शीतकालीन सत्रस्य चतुर्थे दिवसेऽपि व्यवधान-पुरस्सरं स्थगितम् जातम्। प्रमुख व्यापारिक समूहं विरूद्धय कथित-प्रवञ्चना- आरोपान् समेत्य विभिन्न प्रकरणेषु राज्यसभा लोकसभा उभयोः सदनयोः कार्यजातं दिवसात्मकं यावत् स्थिगितम् । लोकसभायाः पुनः कार्य यदा प्रारब्धं, कांग्रेस, डी एम के, समाजवादी, विपिक्ष-दलीय सदस्यैः तुमुलकोलाहलं कृतवन्तः। प्रश्नकालमपि, अध्यक्षस्य ओम बिरलायाः अपील-अनन्तरमपि प्रचलितम् ।



## संघर्षमय जीवनम्

जीवनं वै संघर्षस्य स्वरूपं,
वा संघर्षः एव जीवनस्य बंधु।
मरुस्थलीय मरीचिकायां,
सत्यं लुप्तं दृश्यते भ्रमायां।
प्रत्येकः पदः, शूलस्य पथः,
प्रत्येकं स्वप्नं, छायायाम् निहितः।
सुखं दुःखस्य रेखायां विलसति,
सत्यं मोहजालं मध्ये विलुप्तं।
कालचक्रस्य अविरामं परिभ्रमणं,
जीवनं संघर्षेण केवलं परिणतं।
हर तरंगः विषम भावनायाः,
हर क्षणः अस्तित्वस्य परीक्षायाः।
असंतोषस्य तीव्र ज्वालायां,
सन्तोषः ध्वनिरूपेण गुंफितः।
मरुभूमेः अनन्त विस्तारं,
जीवनस्य मार्गं प्रतिबिंबितं।
तथापि संघर्षः, अमृतस्य स्रोतः,
अंधकारे प्रकाशस्य समारंभः।
जीवनं संघर्षेणैव सिध्यति,
संघर्षः जीवनस्य सारं निवर्तयति।



**हिमसंस्कृतवार्ताः - इन्दु बारौठ (चारण) लंदनम्**

# HP NEWS :सोमवासरे गुरुवासरे च स्वकार्यालये उपस्थितः भूत्वा जनसमस्यानां अनिवार्यतया समाधानं करिष्यन् उपायुक्ताः पुलिसाधीक्षकाः च



हिमसंस्कृतवार्ताः - शिमला। मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खोः आदेशानुसारम् अधुना सर्वेषां मण्डलानां उपायुक्ताः प्रतिसप्ताहं सोमवासरे गुरुवासरे च स्वकार्यालयेषु उपस्थिताः भूत्वा अनिवार्यतया जनसमस्यानां समाधानं करिष्यन्ति। प्रशासनिकसुधारसचिवः अस्मिन् विषये अधिसूचना कृतवान् अस्ति। आदेशानुसारं सोमवासरस्य गुरुवासरस्य वा सार्वजनिकावकाशस्य सन्दर्भे अग्रिमे कार्यदिने उपायुक्तः कार्यालये उपस्थितः भविष्यति। एते निर्देशाः सर्वेषु जिलापुलिसाधीक्षकेषु अपि प्रवर्तन्ते।मुख्यमन्त्री ७-८ नवम्बर् दिनाङ्के शिमलानगरे डीसी-एसपी-सम्मेलने एतान् निर्देशान् दत्तवान् आसीत् । सः अवदत् यत् सार्वजनिकसमस्यानां शीघ्रं निवारणाय सप्ताहस्य कतिपयेषु दिनेषु उपायुक्ताः, पुलिसाधीक्षकाः च कार्यालये उपस्थिताः भवेयुः येन जनानां समस्यानां समये समाधानं सुनिश्चितं कर्तुं शक्यते। सुक्खुः उक्तवान् यत् राज्यसर्वकारः सुशासनं प्राधान्यं दत्त्वा जनानां समस्यानां शीघ्रं निराकरणं प्रति ध्यानं ददाति। राज्यसर्वकारेण 'सर्वकारः ग्रामस्य द्वारम्' इति कार्यक्रमः अपि आरब्धः, यस्मिन् सर्वे मन्त्रिणः ग्रामीणक्षेत्रेषु गत्वा स्थले एव जनानां समस्यानां समाधानं कुर्वन्ति।सः अवदत् यत् राजस्वलोक-न्यायालय-सञ्चालनेन अद्यावधि २.५ लक्षाधिकाः लम्बितराजस्वप्रकरणाः निराकृताः, जनानां कृते पुनः पुनः सर्वकारीयकार्यालयेषु गन्तुं न प्रयोजनम्। मुख्यमन्त्री उक्तवान् यत् उत्तमसुशासनस्य कृते जिला उपायुक्तः महत्त्वपूर्णा श्रृंखला अस्ति। यदि जनपदेषु जनानां समस्याः समये एव निराकृताः भवन्ति तर्हि जनसामान्यं संबलं प्रदास्यते, प्रशासनिकप्रक्रिया अपि अधिकप्रभाविणः भविष्यन्ति। एतदर्थं सर्वेभ्यः उपायुक्तेभ्यः प्रतिसप्ताहं द्वयोः दिवसयोः कार्यालये उपवेष्टुं निर्देशः दत्तः अस्ति।

## {चित्-चन्- प्रयोगाः- पुंलिङ्गे}

(१) कश्चित् बालकः पठति।
(२) कौचित् बालकौ पठतः।
(३) केचित् बालकाः पठन्ति।
(४) बालः कञ्चित् साधुं पश्यति।
(५) बाला कौचित् साधू पश्यति।
(६) बालः कांश्चित् साधून् पश्यति।
(७) पङ्गुः केनचित् दण्डेन चलति।
(८) पङ्गुः काभ्याञ्चित् दण्डाभ्यां चलति।
(९) बालाः कैश्चित् दण्डैः क्रीडन्ति।
(१०) माता कस्मैचित् भिक्षुकाय भिक्षां ददाति।
(११) माता काभ्याञ्चित् भिक्षुकाभ्यां भिक्षां ददाति।
(१२) माता केभ्यश्चित् भिक्षुकेभ्यः भिक्षां ददाति।
(१३) कस्माच्चित् वृक्षात् पत्रं पतति।
(१४) काभ्याञ्चित् वृक्षाभ्यां पत्राणि पतन्ति।
(१५) केभ्यश्चित् वृक्षेभ्यः पत्राणि पतन्ति।
(१६) कस्यचित् बालकस्य स्यूतः अस्ति।
(१७) कयोश्चित् बालकयोः स्यूतौ स्तः।
(१८) केषाञ्चित् बालकानां स्यूताः सन्ति।
(१९) ब्रह्मचारि कस्मिंश्चित् उटजे वसति।
(२०) एतौ कयोश्चित् उटजयोः वसतः।
(२१) एते केषुचित् उटजेषु वसन्ति।

हिमसंस्कृतवार्ताः
✍व्यासवसिष्ठः

## {चित्-चन-प्रयोगाः- स्त्रीलिङ्गे}

(१) काचित् बालिका लिखति।
(२) केचित् बालिके लिखतः।
(३) काश्चित् बालिकाः लिखन्ति।
(४) बालः काञ्चित् वृद्धां पश्यति।
(५) बाला केचित् वृद्धे पश्यति।
(६) बालः काश्चित् वृद्धाः पश्यति।
(७) बालः कयाचित् महिलया सह गच्छति।
(८) बालिका काभ्याञ्चित् महिलाभ्यां सह गच्छति।
(९) बालिका काभिश्चित् महिलाभिः सह गच्छति।
(१०) माता कस्यैचित् ब्रह्मचारिण्यै भिक्षां ददाति।
(११) माता काभ्याञ्चित् ब्रह्मचारिणीभ्यां भिक्षां ददाति।
(१२) माता काभ्यश्चित् ब्रह्मचारिणीभ्यः भिक्षां ददाति।
(१३) कस्याश्चित् लतायाः पुष्पं पतति।
(१४) काभ्याञ्चित् लताभ्यां पुष्पाणि पतन्ति।
(१५) काभ्यश्चित् लताभ्यः पुष्पाणि पतन्ति।
(१६) कस्याश्चित् छात्रायाः लेखनी अस्ति।
(१७) कयोश्चित् छात्रयोः पुस्तकानि सन्ति।
(१८) कासाञ्चित् छात्राणां घट्यः सन्ति।
(१९) एषः कस्याञ्चित् पाठशालायां पठति।
(२०) एतौ कयोश्चित् पाठशालयोः पठतः।
(२१) एते कासुचित् पाठशालासु पठन्ति।

# सामान्यज्ञानप्रश्नोत्तरी-

## सामान्यज्ञानम्

प्रश्नः 1. अमरनाथमन्दिरं (पार्वतीशिवमन्दिरम्) कुत्र अस्ति?
उत्तरम्- पहलगाम, (जम्मू-कश्मीरम्)
प्रश्नः 2. 'कुमारसंभवम्, इत्यस्य रचयिता कः अस्ति?
उत्तरम् - महाकविः कालिदासः।
प्रश्नः 3. भारतस्य राष्ट्रीयशाकं किम् अस्ति?
उत्तरम्- सीताफलम्, काशीफलम्, कूष्माण्डम्, पुष्पफलम्, वल्लीफलम्, वृहत्फलम् च इति।
प्रश्नः 4. कस्मिन् महाद्वीपे सर्वाधिकाः देशाः सन्ति?
उत्तरम् - अफ्रीका महाद्वीपे।'
प्रश्नः 5. वर्तमानसमये भारतस्य रक्षामन्त्री कः?
उत्तरम्- श्रीमान् राजनाथसिंहः।

## संस्कृतज्ञानम्

प्रश्नः 1. अति + अधिकम्' इति पदस्य सन्धिः किम्?
उत्तरम्- अत्यधिकम्।
प्रश्नः 2. 'श' इत्यस्य उच्चारणस्थानं किम्?
उत्तरम्- तालुः।
प्रश्नः 3. सप्तानां शतानां समाहारः (सप्तशती) इत्यत्र कः समासः?
उत्तरम्- द्विगुसमासः।
प्रश्नः 4. 'कस्मात्' इत्यस्य पदपरिचयं देयम्।
उत्तरम्- पुल्लिङ्गः- नपुंसकलिङ्गः, किम् शब्दः पञ्चमीविभक्तिः एकवचनम्।
प्रश्नः 5. संस्कृते समयः '09:15' भवति-
उत्तरम्- सपाद नववादनम्।

हिमसंस्कृतवार्ताः डॉ. विवेक शर्मा, जोगिन्द्रनगरम्



# जगदीशचन्द्रवसुः

३० नवेम्बर् १८५८- २३ नवेम्बर् १९३७) प्रसिद्धः भौतविज्ञानी, सस्यविज्ञानी च । अयं १८५८ तमे वर्षे नवेम्बर्-मासस्य ३० तमे दिनाङ्के भारतस्य मेमेन्सिङ्ग् इति प्रदेशे (इदानीं बाङ्गलादेशे अस्ति) जन्म प्राप्नोत् ।

## प्राथमिकजीवनम्

अस्य पिता भार्गवचन्द्रः फरीदपुरम् इति मण्डले सहायकन्यायाधीशः आसीत् । अनेन जगदीशचन्द्रबोसेन आरम्भिकं शिक्षणं बङ्गालीभाषया एव प्राप्तम् । अनन्तरं सः शिक्षणार्थाय भारतस्य कोल्कत्तानगरम् अगच्छत् । तदवसरे तत्र ग्रामप्रदेशात् आगतम् एतं जगदीशचन्द्रबोसम् अन्ये छात्राः उपहसन्ति स्म । कदाचित् कुपितः सः जगदीशचन्द्रबोसः तेषु बलाढ्यं कञ्चित् सम्यक् प्रहृत्य उन्नीय अक्षिपत् । तदनन्तरं कोऽपि छात्रः अस्य उपहासं न अकरोत् । महाविद्यालयस्य शिक्षणं समाप्य जगदीशचन्द्रबोसेन अग्रिमस्य शिक्षणस्य निमित्तम् इङ्ग्लेण्ड्देशं प्रति गन्तव्यम् आसीत् । किन्तु गृहे आर्थिकी परिस्थितिः तावती उत्तमा न आसीत् । अनन्तरं तस्य माता आभरणानि विक्रीय तं वैद्यशिक्षणार्थं विदेशं प्रति प्रेषितवती । तत्र इङ्ग्लेण्ड्देशे लण्डन् तथा केम्ब्रिड्ज् विश्वविद्यालयेषु अयं जगदीशचन्द्रबोसः अध्ययनम् अकरोत् । तत्र भौतविज्ञानिना लार्ड् लेलिङ्गेन प्रभावितः सन् भौतशास्त्रे आसक्तः अभवत् । ततः सः भौतशास्त्रं, रसायनशास्त्रं, सस्यशास्त्रं च अपठत् ।

## कर्मजीवनम्

इङ्ग्लेण्ड्देशतः पदवीं प्राप्य भारतं प्रत्यागतः जगदीशचन्द्रबोसः कोल्कत्तानगरस्य प्रेसिडेन्सिमहाविद्यालये १८८५ तः १९१५ पर्यन्तं भौतशास्त्रस्य अध्यापकरूपेण कार्यम् अकरोत् । तत्र तादृशं गौरवं प्राप्तवत्सु भारतीयेषु अयं जगदीशचन्द्रबोसः एव प्रथमः । तदवसरे भारते ब्रिटिशजनानां शासनम् असीत् । प्रेसिडेन्सिमहाविद्यालये ब्रिट्श्-अध्यापकेभ्यः अधिकं वेतनं, भारतीयाय अस्मै जगदीशचन्द्रबोसाय च न्यूनं वेतनं दीयते स्म । तां पद्धतिं विरुध्य सः अहिंसात्मकं प्रतिभटनम् अपि अकरोत् । बहुकालं यावत् वेतनं विना कार्यं कुर्वन् न्यायार्थं प्रतिभटनम् अकरोत् । अन्ते ब्रिटिश्-सर्वकारः सर्वेषाम् अपि समानां व्यवस्थाम् अकल्पयत् । तदनन्तरं सः जगदीशचन्द्रबोसः "बोस् संशोधनसंस्थां" प्रतिष्ठाप्य १९१७ तः १९३७ पर्यन्तं तस्याः निदेशकत्वेन कार्यम् अकरोत् ।क्रेस्कोग्राफ्

अयं जगदीशचन्द्रबोसः १९१८ वर्षे "क्रेस्कोग्राफ्" नामकम् उपकरणं निर्माय सस्यानां चलनं संशोधितवान् । एकनिमेषाभ्यन्तरे सस्यस्य शरीरे याः क्रियाः सम्भवन्ति ताः अपि अभिज्ञातुं समर्थम् आसीत् तत् यन्त्रम् । प्रख्यातः फ्रेञ्च् विज्ञानी अस्य जगदीशचन्द्रबोसस्य संशोधनानां फलितांशम् अवलोक्य "मूकान् अपि प्राणिनः अयं जगदीशचन्द्रबोसः वाक्चतुरान् अकरोत्" इति उक्तवान् आसीत् । सस्येषु जलस्य ऊर्ध्वचलनस्य सम्बद्धं "स्पन्दनसिद्धान्तं" (Pulsation theory) १९२३ तमे वर्षे अमण्डयत् । सस्येषु जलं जीवकोषाणां द्वारा एव ऊर्ध्वमुखं गच्छति ।